मनोवृत्तिः । "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" श्रुतिः । ४कर्मणि च "उधः स धियासुदस्वनः" ऋ० ५।११।१६। "धियां कर्मणाम्" भा० "धीभिश्चन मनसा स्वेभिरक्षभिः" ऋ० १।१३९।२ ५मनसि च "धीजवनोऽसि सोम !" ऋ० ९।८८।३ "धीजवनः मनोवेगः" भा० धीगुणशब्दे दृश्यम् ।

**धीक्ष** दीक्षार्थे भ्वा०आत्म०सक०सेट् । धीक्षते अधीक्षिष्ट दिधीक्षे "स वै धीक्षते वाचे हि धीक्षते यज्ञाय हि धीक्षते यज्ञो हि वाग् धीक्षितोह वै नामैतद्यद्दीक्षते" शत०३।२।२३०। अयञ्च वैदिकः दीक्षसमानार्थकः । लोके तु दीक्षतेइत्यादि

**धीगुण** पु० ६० । "शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा । ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः" कामन्दकोक्तेषु अष्टसु बुद्धिधर्मेषु "धियां समस्तैः स गुणैरुदारधीः" रघुः ।

**धीत** त्रि० धे—क्त । १पीते धी—क्त । धीनः लोके । वेदे तु धीतः । २अनादृते ३आराधिते च त्रि० ।

**धीति** स्त्री धे—क्तिन् । १पाने २पिपासायां हेमच० । ३अनादरे ४आराधने च ५अङ्गुलौ निघ० । "तमीं हिन्वन्ति धीतयो दश व्रिशः" ऋ०१।१४४।५ "धीतयो दशसंख्यका अङ्गुलयः" भा० । "धीतिरुक्थाय शस्यते" ऋ० १।११०।१

**धीदा** स्त्री धियं ददाति दा—क । १मनीषायां २कन्यायां हेम० ३बुद्धिदायके त्रि० । [३१५१ पृ० दृश्यम् ।

**धीन्द्रिय** न० धीजनकमिन्द्रियम् । श्रोत्रादौ ज्ञानेन्द्रियशब्दे

**धीमत्** पु० धीः प्रज्ञास्त्यस्य मतुप् । १बृहस्पतौ २बुद्धिमति पण्डितादौ त्रि० । "स्वायम्भुवो मनुर्धीमानिदं शास्त्रमकल्पयत्" मनुः स्त्रियां ङीप् । [पृ० दृश्यम् ।

**धीर** अवज्ञायाम् नित्यमवपूर्वकोऽयम् अवधीरवत् तच्छब्दे ४२७

**धीर** त्रि० धियं राति रा—क । धियमीरयति ईर—अण् वा उप०स० । १पण्डिते २धैर्य्यान्विते अचञ्चले ३स्वैरे मेदि० । ४बलयुते शब्दर० । ५मन्दे त्रिका० ६विनीते संक्षिप्त० । ७कुङ्कुमे न०मेदि० । ८ऋषभौषधौ पु० राजनि० । ९बलिराजे पु०शब्दच० । १०चिदाभासद्वारा बुद्धिवृत्तिप्रेरके चिदात्मनि पु० । ११मनोहरे त्रि० "धीरसमीरे यमुनातीरे वसति वने वनमाली" गीतगो० "प्रवृद्धमन्द्राम्बुदधीरनादः" माघः । "हृदङ्कधीरध्वनिमन्वगच्छत्" रघुः । "अवोचदेनं गगनस्पृशा रघुः स्वरेण धीरेण निवर्तयन्निव" रघुः । तत्र पण्डिते "धीरैर्धीरोद्धतः कथितः" सा० द० ।

"सोपधानान्धियं धीराः स्थेयसीं खट्वयन्ति ये" माघः । १२काकोल्यां १३महाज्योतिष्मत्यां स्त्री राजनि० १४मानयुतायां मध्यायां प्रगल्भायां च नायिकायां स्त्री । तल्लक्षणभेदादिकं रसमञ्जर्य्यामुक्तं यथा

"मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे धीरा अधीरा धीराधीरा च व्यङ्ग्यकोपप्रकाशिका धीरा । अव्यङ्ग्यकोपप्रकाशिका अधीरा । व्यङ्ग्याव्यङ्ग्यकोपप्रकाशिका धीराधीरा । इयांस्तु विशेषः । मध्याया धीरायाः कोपस्य गीर्व्यञ्जिका । अधीरायाः परुषवाक् । धीराधीरायास्तु वदनरुदिते कोपप्रकाशके । प्रौढाया धीरायास्तु रत्यौदास्यम् । अधीरायास्तु तर्जनताड़नादिः । धीराधीरायास्तु रत्यौदास्यतर्जनताड़नादिश्च कोपस्य प्रकाशकम् । यत्तु धीराभेदः स्वीयायामेव न तु परकीयायामिति प्राचीनलिखनम् तदाज्ञामात्रं धीरत्वमधीरत्वं तदुभयं वा माननियतं परकीयाया अपि मानस्तत्तासामप्यावश्यकम् । मानश्च स्वीयायामेव न तु परकीयाया इति वक्तुं न शक्यते" ।

साहित्यदर्पणे तु अन्यथोक्तम् यथा

"ते धीरा चाप्यधीरा च धीराधीरेति षड्विधे" ते मध्या प्रगल्भे तत्र । "प्रियं सोत्प्रासवक्रोक्त्या मध्या धीरा दहेद्रुषा । धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः । तत्र मध्याधीरा यथा "तदवितथमवादीर्य्यन्मम त्वं प्रियेति प्रियजनपरिभुक्तं यद् दुकूलं दधानः । मदधिवसतिमागाः, कामिनां मण्डनश्रीर्व्रजति हि सफलत्वं वल्लभालोकनेन" । प्रगल्भा यदि धीरा स्याच्छन्नकोपाकृतिस्तदा । उदास्ते सुरते तत्र दर्शयन्त्यादरान् बहिः । तत्र प्रिये । "एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरतस्ताम्बूलानयनच्छलेन रभसाऽऽश्लेषो संविघ्नितः । आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः" । प्रत्येकं ता अपि द्विधा । कनिष्ठाज्येष्ठारूपत्वान्नायकप्रणयं प्रति" ।

**धीरता** स्त्री धीरस्य भावः । १अचाञ्चल्ये २धैर्य्ये ३पाण्डित्ये च "सहजामप्यपहाय धीरताम्" रघुः । "प्रत्यादेशान्न खलु भवतो धीरतां तर्कयामि" मेघ० । त्वधीरत्व तत्रार्थे न० तच्च नायकयोर्गुणभेदे । "प्रागल्भ्यौदार्य्यमाधुर्य्यं शोभा धीरत्वकान्तयः । दीप्तिश्चायत्नजाभावहावहेलाः स्त्रियोऽङ्गजाः । अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः ।